# Shri Veda Vyasa Gadyam

# श्रीवेदव्यासगद्यम्

## Document Information

Text title : Shri Veda Vyasa Gadyam

File name : vedavyAsagadyam.itx

Category : deities_misc, gurudev, gadyam

Location : doc_deities_misc

Author : Yadavarya

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : May 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# श्रीवेदव्यासगद्यम्

शुद्धानन्दोरुसंविद्युतिबलबहुलौदार्यवीर्यसौन्दर्य प्रागल्भ्य स्वातन्त्र्याद्यनन्तपूर्णगुणात्मक विग्रहाय । तादृशानन्त रूपाय । पारतन्त्र्याद्यशेषदोषदूराय । अनन्तानन्त रूपेषु स्वगतानन्तानन्त गुणक्रियारूप भेदविवर्जिताय । स्वनिर्वाहक स्वाभिन्न विशेषबलात् तद्वत्त्व व्यवहारभागिने । अचिन्त्यशक्तिसम्पन्नाय । रमाब्रह्म रुद्रेन्द्रादि सकल जीवजडात्मक प्रपञ्चदात्यन्त भिन्न स्वरूपाय । पञ्चभेदभिन्न श्रीब्रह्मरुद्र प्रभृति सकल सुरासुर नरात्मकस्य प्रपञ्चस्य यथायोग्यं सृष्टि स्थिति संहार नियमन ज्ञानाज्ञान बन्ध मोक्ष प्रदात्रे । ऋगादि चतुर्वेद मूल रामायण ब्रह्मसूत्र महाभारत पञ्चरात्राद्यशेष सदागम प्रतिपादित स्वरूपाय । अनाद्यनन्तकालेपि स्वरूपदेहान्तर्बाह्य देहान्तश्च स्थित्वा सत्याप्रतीति प्रवृत्त्यादिप्रदाय । सर्वस्वामिने । गुरुषु स्थित्वा तद्वारा ज्ञानोपदेष्ट्रे । निरवधिकानन्तानवद्य कल्याण गुणत्वज्ञानपूर्वक स्वात्मात्मीय समस्त वस्तुभ्योनेक गुणाधिकान्तराय सहस्रेणाप्यप्रतिबद्ध निरन्तर प्रेम प्रवाहरूप भक्ति विषयाय । अनन्तवेदोक्त तदनुक्त भारतोक्त प्रकारेण ब्रह्मोपासितानन्त गुणानन्त क्रियानन्त रूपाय । क्रिया सामान्येन सरस्वत्युपासितानन्त रूपाय । गुणक्रिया सामान्येन रुद्रोपासितानन्त रूपाय । गुणक्रिया रूप सामान्येन इन्द्राद्युपासित बहुगुणाय । कर्मक्षयोत्क्रान्तिमार्ग भोगरूप चतुर्विध मुक्तियोग्य मनुष्योत्तमोपासित सच्चिदानन्दात्माख्य चतुर्गुणाय । उत्क्रान्ति मार्गरूप मुक्तिद्वय शून्यावशिष्ट द्विविध मुक्तियोग्याधिकारि विशेषोपासित आत्मत्वरूपैक गुणाय । ब्रह्मादि मानुषोत्तमान्तानामुपासनानुसारेण यथायोग्यं सञ्जात विचित्रापरोक्षज्ञान विषयाय । अत्यर्थं प्रसाद कर्त्रे । अपरोक्षज्ञान महिम्नाग्निना तूलराशिवद्भस्मीभूत प्रारब्ध

पुण्यपापानिष्टकाम्यकर्मणां ब्रह्मोपदेशानां वातपुत्रीयता
प्रसङ्ग परिहाराय भगवतावशेषित भोगेन निःशेषीकृत
पारब्ध कर्मणां सत्यलोके चतुर्मुखाख्य कार्यब्रह्मप्राप्तानां
प्रतीकालम्बनानां वैकुण्ठ लोकस्थित भगवदाख्या कार्यब्रह्म
प्राप्तानां अप्रतीकालम्बनानां महाप्रलये चतुर्मुखं प्राप्तानां
स्वोत्तम प्रवेशद्वारा शेषमार्ग गरुडमार्गाभ्यां गतानां देवानां
च ब्रह्मणासह विरजास्नानेन लिङ्गभङ्ग प्रापयित्वा आविर्भूत
विचित्र स्वरूपानन्दानुभवदात्रे । ब्रह्माद्येकान्त भक्तानां
निरुपाधिकेष्टाय । तदितरभक्तानां मोक्टोद्देशेन भजनीयाय ।
साकिल्येन रमाब्रह्माद्यचिन्त्य स्वरूपाय । व्याख्याश्री सर्वविज्ञान
कविता विजयादि सद्गुण प्रदात्रे । ब्रह्मसूत्र महाभारत
श्रीमद्भागवताद्यशेष सच्छास्त्रकर्त्रे । विष्णुनाम्निसंहिता
देवतात्वेन ह्रस्वमाण्डूकेयोपासिताय । वासुदेवादि चतूरूपाय ।
मत्स्यकूर्म वराह नारसिंह वामनभार्गव राघव कृष्ण बुद्ध
कल्कि स्वरूपाय । श्रीमद्धनुमत्सेव्य दाशरथि रामात्मकाय
द्रौपदीप्रिय भीमसेनाराध्य श्रीयादवकृष्ण स्वरूपिणे ।
ऋदन्दश्वात्मक श्रीहयग्रीव स्वरूपाय । जाग्रदाद्यवस्था
प्रवर्तक विश्वादित्रितय रूपाय । षड्शतैकविंशत्सहस्र
श्वासरूप हंसमन्त्र जप प्रेरकाय । द्वासप्तति सहस्रनाडीषु
मध्ये दक्षिण भागस्थित षड्विंशतृहस्र पुरुष रूपात्मकाय ।
वामभागस्थित षड्विंशत्सहस्र स्त्रीरूपात्मकाय । परमहंसोपास्य
तुरीय रूपिणे । आत्मादि चतुरूपिणे । कृद्धोल्कादि पञ्चरूपिणे ।
कपिल दत्तात्रेय ऋषभ नारायण हरिकृष्ण तापस मनु महिदास
यज्ञ धन्वन्तरी नारायणी सनत्कुमार धवलपक्ष विराजित हंस
स्वरूपाय । केशवादि चतुर्विंशतिव्यूहाय । नारायण नरशौर्यादि
शतरूपिणे । विश्व विष्णु वषड्कारादि सहस्ररूपिणे । परादि
बहुरूपिणे । अजिताद्यनन्तरूपिणे । कलिकाल प्रवृत्तये ऋषिभिः
सहान्तर्धाय गन्धमादनपर्वतस्थित बदरिकाश्रम निवासिने ।
बादरायणाय । बादरि जैमिनि सुमन्तु वैशम्पायन काशकृत्स्नलोमश
कार्ष्णाजिन्यौडुलोम्यात्रेयपूर्वक शिष्यसङ्घ परिवृताय ।
कीरपद मुनिनुताय । स्वाज्ञानुसारेणावतारितकृत समस्त कार्य
परित्यक्त भूमण्डल प्राप्त बदरिकाश्रम मरुदवतारानन्दतीर्थ

पूर्णप्रज्ञापर पर्याय श्रीमध्वाचार्य संसेवित श्रीचरणाय ।
सात्यवतेयाय । पाराशर्याय । कृष्ण द्वैपायनाय । जीवान्तः स्थित्वा सर्वकर्मकारयित्रे । अशेष सत्कर्म फलदात्रे । तत्त्वदेवता प्रेरकाय । अस्मत्कुलदेवतात्मक श्रीवेङ्कटेशात्मने । अनन्ताय । इन्दिरापतये । अस्मद्गुरुवराचार्य करवर पूजित चरणनलिनयुगलाय । अस्मद्गुरुवर्यान्तर्गत श्रीमदानन्दतीर्थार्य हृत्कमलमध्यनिवासिने ॥

विज्ञानरोचिः परिपूरितान्तर्बाह्याण्डकोशाय । अकारादि पञ्चाशद्वर्ण देवताजादिभिः स्वर्णघट परिपूर्ण पीयूष सिक्ताय । शुभमरकत वर्णाय । रक्तपादाब्ज नेत्राधरकरनखरसनाग्राय । शङ्ख चक्र गदापद्म धराय । परम सुन्दराय । रुचिरवरैण चर्मणा भासमानाय । तटिदमलजटा सन्दीप्त चूडं दधानाय । नीलालक सहस्त शोभित मूर्ध्ने । सुव्यक्तश्मश्रुमण्डलाय । ललाट शोभित तिलकाय । अम्भोजभवभवादि भुवनानां दभ्रविभ्रमादेव विभवाभिववोद्भवादि पारमेष्ठ्यादि पदविमुक्तिदातृभ्रू विलासाय । कमलायतलोचनाय । निखिलाघौघ विनाशक परसौख्य प्रदद्दृष्टये । तुलसी भासित कर्णाय । समस्त वेदोद्गीरण हेतुभूत श्रीमुखाय । अवनताखिललोक शोकसागरविशोषकात्युदारमन्दहासाय । अरुणोष्ठरोचिषारुणीकृत सितदन्त पङ्क्तये । कम्बुवद्रेखात्रयोपेत ब्रह्माधिष्ठित कौस्तुभरत्नोद्भासित कण्ठाय । श्रीवत्साङ्कित श्रीदेव्यास्पद विस्तीर्ण वक्षसे । तनुत्वेप्यन्तर्गत जगदण्डमण्डल वलित्रयाङ्कितोदराय । हरिन्मणिकान्ति मुङ्विशद हारमयूख गौरस्तनद्वयोपेताय । आत्मयोनिधिषण चतुर्दश भुवन कारणदलोपेत पद्मजनक तनुनिम्नावर्तनाभिसरसे । त्रयीमय यज्ञोपवीत धारिणे । दिव्य मौञ्जीधारणे । अचल परमाजिन योग पीठोपविष्टाय । परितः स्थितवर पट्टिका रूपकक्षायुताय । स्वभक्ताज्ञाननाशक तर्कापरपर्याय प्रबोधमुद्रायुत पृथुपीवर वृत्त दक्षिणहस्ताय । स्वभक्त भयभञ्जक समस्त मङ्गलप्रदाभय मुद्रायुत पृथुपीवर वृत्त सव्यहस्ताय । अतसिका कुसुमाव भासोरुद्वयाय । क्रमाल्पवृत्तजङ्घायुगलाय । निगूढ गुल्फाय । बाह्यान्तस्तमो विनाशक परसौख्य प्रदनखमणये । वज्राङ्कुशध्वज पद्मरेखा चिह्नित पादपद्माय । समस्त

पीठदेवतावरण देवतासे व्याय । अनन्तचन्द्राधिककान्तिमते ।
समस्त दुरित निवारणाय । समस्त कामित फलदात्रे मदुपास्याय ।
श्रीवेदव्यासाय नमो नमः ॥

इति श्रीमद्वेदेशतीर्थ पूज्यपादाराधक यादवार्यकृतं
श्रीवेदव्यासगद्यं सम्पूर्णम् ।

Encoded and proofread by Krishnananda Achar

*Shri Veda Vyasa Gadyam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*